संस्कृत

-ग्रं.नं ११८

विधि: ~~प्रयोग~~ - स्मार्त

सर्वदेवमूर्तिप्रतिष्ठाविधि:

3324

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

म्यां च विनश्यति ॥ भद्रकाल्यां कृतास्तत्र कर्तुर्भवतु तुष्टये ॥ धर्मवृद्धिकरी ज्ञे
या दशम्यां तु तथा तिथौ ॥ एकादश्यां तथा युक्ता द्वादश्यां सर्वकामदा ॥ त्रयो
दश्यां तथा ज्ञेया चतुर्दश्यां वि[illegible] नश्यति ॥ ९ ॥ अथ अयनविधिः ॥ माधवी
ये वैखानसः ॥ मात्स्यभैरव[illegible]वाराहनृसिंहस्य त्रिविक्रमः ॥ माहिषसुरस्य
हंत्र्यश्च स्थाप्य वै दक्षिणायने ॥ अथ यजमानः ॥ ततः मंडपं कृत्वा अकृ
त्वा ॥ यादि कृते अभ्युदयस्तदा उक्तप्रकारेण कृत्वा पूजादिकं कुर्यात् ॥
अकृते साधारणं छायामात्रं नानाफलपुष्पयुतं विना तं चामरालंकृतं
मंडपं कृत्वा ॥ पूर्वोक्तकाले आग्नेय हस्तमात्रं कुंडं स्थंडिलं वा चतुरस्रं वि
धाय ॥ ततः ईशान्ये हस्तमात्रां चतुरस्रां वेदिं कृत्वा ॥ तदुपरि सर्वतोभ

ड्ं कृत्वा ॥ तदुत्तरतः अभिषेकार्थं शय्यावेदिं कृत्वा ॥ अथ यजमानः ॥ आचम्य
(२) प्राणानायम्य देशकालौ संकीर्त्य ॥ मम इह जन्मनि जन्मांतरे च सकलदोषाप
नुत्तये मातृतश्च पितृतश्च आत्मसहितैकविंशति कुलमुद्धरणार्थं चतुर्विध
पुरुषार्थ दीर्घायुर्लक्ष्मीप्राप्त्यर्थं पुत्रपौत्रादिवृद्ध्यर्थं अक्षय्यसुखकाम
नासिद्ध्यर्थं देवस्य सांनिध्यार्थं विष्णुलोकप्राप्त्यर्थं श्रीसांबशिव अमुकमूर्ति
प्रतिष्ठापनमहं करिष्य इति संकल्प्य ॥ तदंगं गणपतिपूजनपूर्वकं स्वस्तिपुण्या
हवाचनं मातृकापूजनं अंकुरार्पण कौतुकबंधनं नांदीश्राद्धं आचार्यादि
ऋत्विक्वरणं च करिष्ये ॥ ततः आचार्यवरणं कुर्यात् ॥ गोत्रोच्चार्य पूर्वकं राम
कृत्वा ॥ अमुकमूर्तिप्रतिष्ठांगभूतं आचार्यं त्वामहं वृणे ॥ आचार्यस्तु यथा



" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वममयज्ञेस्मिन् आचार्यो भव सुव्रत ॥ १ ॥
अथ ब्रह्म वर्णनं ॥ यथा चतुर्मुखो ब्रह्मा स्वर्गलोके व्यवस्थितः ॥ तथा त्वम
मयज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम ॥ २ ॥ अस्य यागस्य निष्पत्तौ भवंतो भ्यर्चि
ता मया ॥ अथ ऋत्विज ऋत्वतारो अशेवा ॥ ऋग्वेदः प्रथम १ त्राक्षणायत्रेः सोमदे
वता ॥ अग्निहोत्र सत्कृ विप्रेंद्र ऋत्विकु त्वं मम मखे ॥ आचार्याय मधुपर्क वस्त्रा
दिभिः पूजयिष्ये ॥ ततः आचार्यं ... पूजयिष्ये ॥ यदत्र संस्थितं भूतं० ॥ अपक्रा
मंतु भूतानि० रक्षेत ॥ इति सर्षपान् विकीर्य ॥ पंचगव्येन शुचीवो हव्या मरुतः०
शुद्धो वाजं सिषासिसि ॥ आपो हिष्ठा मयोभुव० यथा वचन ॥ कुशोदकेन भू
मिं प्रोक्ष्य ॥ स्वस्त्ययनं तार्क्ष्यमरि० स्वस्त्ययनं नो अस्तु ॥ देवाः आयांतु यातु धा

नोऽपआयांतुविश्वेदेवयजनंरक्षस्व॥इतिमंत्रेणभूमौप्रादेशंकुर्यात्॥त
(3) तः पंचगव्यंकृत्वा॥पंचगव्येनहिरण्यदूर्वापालाशपर्णैः॥ आपोहिष्ठामयो
भुवःस्तान०श्चाचनः॥तिसृभिर्मंत्रैःभूमिंप्रोक्ष्य॥ओंभूर्भुवःस्वः इदंवि
ष्णुर्विचक्रमे० स्फुरेइतिमंत्रेणफलयवदूर्वासमर्प्य॥रक्षोहणंवाजिनमाजि०
पातुनक्ते॥इतिमंत्रेणदेवस्यदक्षिणहस्तेकंकणंबध्वा॥वाससाआच्छाद्य॥
अवतेहेलोवरुण० कृतानि॥उदुत्तमंवरुण० श्रथाय॥इतिमंत्राभ्यांजलेधिवा
सयेत्॥ततःसर्वतोभद्रंकृत्वा॥ततःस्थंडिलउपलेपनादिअग्निप्रतिष्ठापनां
तंकृत्वा॥सर्वतोभद्रदेवतास्थापनंकृत्वा॥संमुखोभव॥ईशान्यांवेद्यांदोनव राम
ग्रहादीस्तत्तन्मंत्रैरावाह्यषोडशोपचारैःसंपूज्य॥ईशान्यांप्राग्वत्कुंभंसं

स्थापनत्त्रवरुणमावाह्याग्निसमीपे स्मत्वा प्रधानं कुर्यात्॥ तथा प्रवोच्चरितं
(3A) ह क्रियमाणे ग्रैहहोमे देवतापरिहारार्थं स्थापनार्हहोमे देवतोपरिहारार्थं मन्वा
धानं करिष्ये॥ अस्मिन्नन्वाहिते न्वाविस्मादि-चक्षुषी आज्येनेत्यंतमुक्त्वा॥
अत्रप्रधानं॥ आदित्यादिप्रधानदेवता: प्रत्येकं अष्टाविंशत्यष्टसंख्या
काभि: समित्तिल-चर्वाज्याहुतिभि:॥ अधिदेवताप्रत्यधिदेवताप्रत्येकं
अष्टाष्टसंख्याकाभि: चर्वाज्यद्रव्येण अशेषलोकपालेभ्य: प्रत्येकंपालश
औदुंबरअश्वत्थशमिवट अपामार्गसमिद्भि: प्रत्येकं अष्टाष्टसंख्याका
भि: समिध्याद्रव्येण॥ स्थापनार्हदेवतादेवमंत्रेण प्रवोक्त समितिल-चर्वा
ज्ये: अष्टसहस्र अष्टशत अष्टाविंशति वा यथाशक्त्ये॥ अग्निर्यजुर्षीरित्यनु

वाकेन दशातिलाज्याहुतिभिः॥ पुरुषसूक्तं त्रिवारं प्रत्यृचं आज्यद्रव्येण शेषेण
(५) स्विष्टकृतमित्यादि सद्यो मध्ये इत्यं नमस्कृ॥ परिस्तरणादि हविरासादनांतं
कृत्वा॥ अग्न्यालंकरणादि चक्षुषी आज्येने संतनमुत्क्र॥ अथ प्रधानहो
कृ मः॥ ततः ग्रहप्रधानहोमं हुत्वा॥ लोपाले पूर्वतः शमीपालाशा औदुंबर अश्व
त्थ अपामार्गसमिद्भिः॥ प्रत्येकं अष्टाविंशरष्टौ कृत्वा॥ स्थापना हेदेवमंत्रे
ण स्वामि तिलचरुवाज्यैः रष्टसहस्रं रष्टशतं वा अष्टाविंशति वा कृत्वा॥ अग्निर्वा
युर्भिः रित्यनुवाकेन दशाहुतिभिस्तिलाज्यैर्हुत्वा॥ आज्यहोमकाले अग्ने
रुत्तरतः कलशे घृताहुतिशेषेण संपातान्निक्षिपेत्॥ अग्निर्मे तुभिः॥ स राम
विता स्तोमैः स्वाहा॥ १॥ इंद्रदुक्थ्यामदेः॥ मित्रावरुणावाशिषा स्वाहा॥ २॥



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(4A)

अंगिरसोधिष्ण्यैरग्निभिः ॥ मरुतः सदो हविर्धानाभ्यां स्वाहा ॥ ३ ॥ आपः
प्रोक्षणीभिः ॥ ओषधयो बर्हिषा स्वाहा ॥ ४ ॥ अदितिर्वेद्यां ॥ सोमो दीक्षया स्वा
हा ॥ ५ ॥ त्वष्ट्रध्मेन ॥ विष्णुर्यज्ञेन स्वाहा ॥ ६ ॥ वसव आज्येन ॥ आदित्या दक्षि
णाभिः स्वाहा ॥ ७ ॥ विश्वेदेवा ऊर्जा ॥ पूषा स्वगाकारेण स्वाहा ॥ ८ ॥ बृहस्प
तिः पुरोधया ॥ प्रजापतिरनुमीथेन स्वाहा ॥ ९ ॥ अंतरिक्षं पवित्रेण ॥ वायुः
पात्रैः ॥ अहं श्रद्धया स्वाहा ॥ १० ॥ प्रातद्रव्यैर्होमांते देवस्य पादनाभिशिर
सि उपस्थापयेत् ॥ ततः आज्यहोमं चतुर्नरत [illegible] सजलकुंभं संपातां नयेत् ॥
ततः आचार्यो शोधयेत् ॥ ततः देवं नत्वा ॥ स्वागतं देवदेवेश विश्वरूप न
मोस्तु ते ॥ शुद्धेपि त्वे दधिष्ठानेशुद्धिं कुर्म हरस्व न ॥ इति संप्रार्थ्य ॥ उ

॥४॥

॥५॥ अग्निः सप्तिमिति सप्तर्चस्य सूक्तस्य सोचिको विश्वेदेवास्त्रिष्टुप्॥ अग्न्युत्तारणे वि०॥ प्राणप्रतिष्ठां कुर्यात्॥ ४
तिष्ठ ब्रह्मणस्पते० सच्चा॥ इति मंत्रेण सन्नर त्विकू देवं उत्थाप्य॥ पूर्वमत्र नोक्त
(5) ग्न्युत्तारणे अधुनावा कार्यं॥ अग्निः सप्तामिति सूक्तं अग्निपदहीनं पठित्वा॥
पुनस्तत्सहितं पठेत्॥ नमः एवं गुण० [illegible]॥ अस्य देवस्य पूज्यत्वाधिकारसिध्य
र्थं दाहतापशमनार्थं अग्न्युत्तारणं करिष्ये॥ एवं अष्टसहस्रमष्टशतं अष्टाविं
शतिर्वा पठेत्॥ जलधारां पातयेत्॥ नमः सूक्तांते ॐ रां रीं रूं रैं रौं रः॥ अग्नये
हिरण्यगर्भादि रूपाय सर्वमुख [illegible] वासं अस्यां मूर्तेः सर्वांगेभ्यः सर्वा
वयवेभ्यः सर्वधातुभ्यः सकाशात् निर्गच्छ तापदाहं शामय शामय सुरश्रीनृ
क्षतां अंगावयव धातुषु कुरु कुरु॥ ॐ सां सीं सूं सैं सौं सः॥ ॐ यां यीं यूं यैं राम
यौं यः॥ ॐ स्वाहा॥ इति सूक्तांते मंत्रान् पठेत्॥ सुगंधद्रव्योद्वर्तनं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

सर्वौषधिलेपनं सस्यधान्यलेपनं ॥ नानिसुगंधद्रव्याणि ॥ चंदन ॥ राला ॥ क
र्पूर ॥ कचोरा ॥ गाठिवन ॥ वाला ॥ धूनपत्रा ॥ भद्रमोथा ॥ एतान्यष्टद्रव्याणि चूर्णीयि
त्वा पयसा संमिश्र्य पांसां चंद्रनीलकंठ अटाजूट वृनस्सुरीनामोदवाहनोंग
मत्यंगावयवधातुभ्यः राजनम्रनेः निष्का राष्यानिष्को राषपदाहनापोपशामयश
मयस्तु रीनल वेकुरुकुरुदाहि दाहि मांसां स्वाहेतिमंत्रेणादशवारमाभिमंत्र्यने
नोद्वर्तयं ॥ ततः सर्वौषधिलेपनं ॥ या ओषधीः पूर्वा० त्र्यंच ॥१॥ शतंवोअंब०
हृत ॥२॥ ओषधीः प्रतिमो० वः ॥३॥ ओषधीरितिमा० ष ॥४॥ अश्वत्थेवोनि० व ॥
॥५॥ यत्रौषधीः सम० नः ॥६॥ अश्वावतीं सो० तये ॥७॥ उच्छुष्मा ओष० ष ॥८॥ इ
ष्कृतिर्नाम० थ ॥९॥ अतिविश्वाः प० पः ॥१०॥ यदिमा वाज० थ्या ॥११॥ यस्यौषधीः प्र०

(6) रिव ॥१२॥ साकं यक्ष्म प्रपत० कया ॥१३॥ अन्या वो अन्या० वचः ॥१४॥ याः फलिनी
र्या० हसः ॥१५॥ इति सप्तधान्यानि ॥ व्रीहियवमाषतिलप्रियंगुमुद्गश्यामाकइता
निसप्तधान्यानि चूर्णयित्वा ॥ येन तो का० यतनया० भगे ॥ इति मंत्रेणोद्धर्त्य ॥
सप्तमृत्तिकेन अन्या चार्यो द्वादशवारं उद्धर्त्य ॥ शुद्धोदकेन प्रक्षाल्य ॥ समंत्रकं पंच
गव्यं कृत्वा ॥ पंचगव्यैः संस्नाप्य ॥ उष्णोदकेन प्रक्षाल्य ॥ ततः घृतेनाभ्यज्य ॥
घृतं मिमिक्षे घृतमस्य० हव्यं ॥ उष्णोदकेन प्रक्षाल्य ॥ ततः गोधूमचूर्णेन उद्धर्त्य ॥
शुद्धोदकेन प्रक्षाल्य ॥ शंन्नो देवीरभिष्टय० तु नः ॥ इति मंत्रेण संस्नाप्य ॥ ततः
कलशोदकेन स्नापयेत् ॥ गंधाद्यर्चितसहपल्लवैः ऋतुभिः कलशैः समु राम
द्रज्येष्ठा सलिलस्य० वंतु ॥१॥ या आपो दिव्या उ० तु ॥२॥ या सां राजा वरुणो० ६

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project of the ..."

(6 A)

वंतु ॥३॥ यास्त्र राजा वरुणो यास्त्र सोमो० वंतु ॥४॥ इति चतुर्भिः आकलशेषु धाव०
र्धने ॥ इत्यादिभिरभिषिच्य देवं नमस्कृत्य ॥ ततः शुद्धोदकेन प्रक्षाल्य ॥ स्रगंध
गंधेनानुलिप्य ॥ ततः औदुंबरपीठ उपविश्य ॥ ततोऽष्टौ दिक्षु सजलकुंभान् संस्था
प्य ॥ तेषु गंधपुष्पदूर्वा क्षिप्त्वा ॥ गोरोचनकुंकुमे शमीपलाशवटखदिरबिल्वअश्व
थवेकंकतनीफणसाम्र आम्रविरउदुंबराणां पल्लवानां कषायां क्षिप्त्वा ॥ ब्रह्मा
देवानामिति दशभिर्ऋग्भिः कुंभैः शिरस्त्रेण वेष्ट्या ॥ तेषु मंत्राः ॥ ब्रह्मा देवानां प०
णा ॥ श्येनो गृध्राणां० भन् ॥१॥ प्रावीविप० षा ॥ अंतः पश्य० २ ॥ समत्सरः पू० र्षी ॥
इंद्राय वें दो० षण्मन् ॥३॥ परिप्रियः क० य ॥ सहस्रधारः० गानि ॥४॥ स प्रत्नो वस्व० द्रो ॥
अभिशाखिपा० मानः ॥५॥ त्वया हि नः पित० राः ॥ वन्वन्नवातः० वानः ॥६॥ यथा प

वध्वाम नवे० ष्मान्॥रा वा पवस्व० धानि॥७॥पवस्वसोम० अव्ये॥अवद्रोणानि०
(७) पानः॥८॥ वृष्टिंदिवः श० वीतो॥संसिंधुभिः क० आयुः॥९॥रा वस्त्रसोमो० रातीः॥
पयोनदुग्धसदि० वोल्हा॥१०॥ कलशादके पात्रांतरेगृहीत्वा पंचपल्लवेन अ चा
यामभिषिच्य॥तत्रमंत्रः॥आपोहिष्ठामयो० से॥योवः शिवत० नरः॥तस्माअरं
ग० चनः॥हिरण्यवर्णाभिश्चतस्रभिः॥हिरण्यवर्णाः शुच० द्रः॥अग्निंयागर्भं० नाभवंतु॥
यासांरराजावरुणो० नानां॥मधुश्च० तु॥यासांदेवा दिवि० ति॥याः पृथि०
तु॥शिवेनमा चक्षुषा० मे॥सर्वांअग्नीं० र० धत्त॥पवमानसूक्तेनइत्यनुवा
केन॥अश्वक्षेत्रो निषदनं पर्णो वो० पुरुषं॥रा तैर्मंत्रैः राभिषिच्य॥पंचरत्नोदके राम
नसंस्नाप्य॥वाससी दत्वा॥उपवीतंदत्वा॥गंधादिपंचोपचारैः संपूज्य॥अर्चा

(७A)

यां परितः दीपान्प्रज्वाल्य ॥ तत्र मंत्रः ॥ हिरण्यगर्भः समवर्तताग्रे० वि धेम ॥ य आ
त्मदा बलदा यस्य० विधेम ॥ यः प्राणतो निमिषतो० धेम ॥ यस्येमे हिमवंतो० धेम ॥ ये
न द्यौरुग्रा पृथिवी० म ॥ यं क्रंदसी अवसा० म ॥ आपो ह यद्बृहं० म ॥ यश्चिदापो महिना०
म ॥ मा नो हिंसीज्जनिता० धेम ॥ प्रजापते न त्व० रयीणां ॥ वर्ग २ ॥ नमः सुवर्णशाला
कया तेजस पात्रस्थं मधुघृतेन चरु होला ॥ चित्रं देवानामुदगा० स्याग्नेः ॥ आप्राय
वा पृ० षश्च ॥ तेजोसीति मंत्राभ्यां दक्षिपास व्यनेत्रे देवस्य नेत्रे मंत्रा ट स्या लिखेत् ॥
अंजंति त्वामध्वरे देवयं० तुपस्थात् ॥ अनेनन धुनाचांडत्वा ॥ देवस्य त्वा सवितुः०
हस्ताभ्यां मध्वाज्यशार्कं फिरड· लोतेनेव चांजनेन पुनरंजयेत् ॥ अत्र अनक्ज्मीति
विशेषः ॥ ॐ नमो भगवते तुभ्यं हरये नमः ॥ हिरण्यरेतसे विष्णुरूपाय ते नमः ॥ इति

(8)

मंत्रेणदक्षिणसव्यदेवंनेत्रेमंत्रावृत्त्यालिखेत्॥ततःअदर्शनानाभक्ष्यादिदर्शयेत्॥
ततःकर्ताआचार्यायगांदद्यात्॥ऋत्विग्भ्यश्चदक्षिणांदत्वा॥आचार्यःपुरुषसूक्तेन
प्रणवपूर्वकंप्रत्यृचंस्तुत्वा॥ततःवेदपात्रेपंचवर्णादनेनदेवस्यनीराजनंकुर्यात्॥
रुद्रायचेतुष्पथादौदद्यात्॥मंत्रस्तु॥ओंनमोविष्णवेसर्वभूताधिपतयेदिव्यशूल
धरायलक्ष्मीप्रियायपवित्राधिपतयेविष्णवेनमः॥विष्णुगृहाणत्वंकमास्तुस्वाहा॥त
तःआचार्यःसर्वतोभद्रदेवतामावाहयेत्॥मंत्रैर्नाममंत्रैर्वा॥मध्येब्रह्माणं॥ब्रह्म
जज्ञानंवामदेवोब्रह्मात्रिष्टुप्॥ब्रह्मस्थापनेविनियोगः॥ॐब्रह्मजज्ञानं०विवः॥
ब्रह्माणंसांगंसपरिवारंआवाहयामि॥रावसुत्तरत्॥उदीचीमारभ्यवायव्यपर्यंतं रामं
कुबेरादीनांअष्टौलोकपालाः॥आप्यायस्वगोतमः॥सोमोगायत्री॥सोममावाह०॥

(8 A)

आप्यायस्वस०थे॥२॥अभित्वा जीगर्त्तिःशुनःशेपईशानोगायत्री॥ईशानावाह०
अभित्वादेव०महे॥३॥इंद्रंवोमधुछंदइंद्रोगायत्री॥इंद्रावाह०॥इंद्रंवोविश्वतः०वलः॥४॥
अग्निंकाण्वोमेध्यातिथिरग्निर्गायत्री॥आग्निमावा०॥अग्निंदूतंवृणी०तुं॥५॥यमाय
सोमंयमोनुष्टुप्॥यममावाह०॥यमायसोमं०नः॥६॥मोषुणोघोरःकाण्वोनिर्ऋतिर्गा
यत्री॥निर्ऋतिमावा०॥मोषुणःपरापरा०॥७॥तत्वायामिशुनःशेपोवरुणःत्रिष्टुप्॥
वरुणावाह०॥तत्वायामिब्र०षीः॥८॥वायोशतंगौतमोवामदेवोवायुरनुष्टुप्॥वायुमावा०॥
वायोःशतंहरी०सा॥९॥वायुसोममष्टोअष्टौवसवनु॥ज्मयाअत्रमैत्रावरुणोवसिष्ठोव
सवःत्रिष्टुप्॥अष्टौवसवना०ज्मयाअत्रवसवो०स्था॥१०॥सोमईशानयोर्मध्येएकादश
रुद्रानु॥आरुद्रासःश्यावाश्वःएकादशरुद्रोजगती॥एकादशरुद्रानावा०॥आरुद्रा
सइंद्रवं०न्यवे॥११॥ईशानेंद्रयोर्मध्येद्वादशादित्यानु॥स्याम्नुसामदेमस्योद्वा

१

दस्राादित्या जगती॥ द्वादशादित्यावा॰॥ स्वाननुक्षत्रियां अव॰ष्टये॥१२॥ इंद्राग्नियोर्मध्ये
अश्विनौ॥ अश्विनारायुरुगणो गोतमो श्विनानुष्टिक्॥ अश्विनावा॰॥ अश्विनावर्ति॰ तं॥१३॥
(9) अग्नियममध्ये विश्वान्देवान्सपेटक्रा॰नू॥ ओमासश्च मधुछंदा विश्वेदेवा गायत्री॥ विश्वेदेवानां॰॥
ओमासश्चर्षणी॰ तं॥१४॥ यमनिर्ऋतिमध्ये सत्यमक्षानू॥ अभित्यं देवं वामदेवः सत्यमक्षा
मरुती॥ सत्यमक्षावीनोहं॰॥ अभित्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधा
मभि प्रियं मतिं कविं। मर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्र
तुः कृपास्वः॥ यमनिर्ऋतिमध्ये सत्यमक्षा आ॰॥१५॥ आयंगोः सार्पराज्ञी सर्पा गायत्री॥
सर्पावाहं॰॥ आयंगोः पृश्निर॰ स्वः॥ निर्ऋतिवरुणमध्ये भूतनाग्नानू आवा॰॥१६॥ अप्स
रसामैतन्वत्सपम्ये गोगंधर्वाप्सरसो नुष्टुप्॥ गंधर्वाप्सरसावाहं॰॥ अप्सरसां गंधर्वाणां॰ मः॥
वरुणवायुमध्ये गंधर्वाप्सरसः आवा॰॥१७॥ कुमारं माता कुमारस्कंदस्त्रिष्टुप्॥ स्कंदावाहं॰॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

कुमारंमातायुव०रत्नौ॥ब्रह्मसोमम ध्येस्कंदनंदीश्वरशूलमहाकालान्आवा०॥१८॥ऋ
षभन्त्यषभोवैराजोऋषभोनुष्टुप्॥ऋषभावा०॥ऋषभंमासमानानां०गावां॥ब्रह्मेशानम
ध्येऋषभंआवा०॥१९॥अदितिर्लौकयोबृहस्पतिः शूलमहाकालोगायत्री॥शूलम
हाकालावा०॥अदितिर्द्यौरदितिर्जनित्व०पर॥ब्रह्मेशानमध्येदक्षादिसप्तगणान्आवा०॥
॥२०॥तामग्निवर्णांसोभरिर्दुर्गात्रिष्टुप्॥दुर्गावाह०॥तामग्निवर्णांतप०नमः॥ब्रह्मे
न्द्रमध्येदुर्गांआवा०॥२१॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥विष्णुवा०॥इदंवि
ष्णुर्वि०समूढे॥ब्रह्मेंद्रयोर्मध्येविष्णुंआवा०॥२२॥उदीरतांशंखःस्वधात्रिष्टुप्॥
स्वधावाह०॥उदीरतामवरउ०मुः॥ब्रह्माग्निमध्येस्वधांआ०॥२३॥परंमृत्योःसं
कुसुकोमृत्युरोगाःत्रिष्टुप्॥मृत्युरोगावा०॥परंमृत्योअनुपरे०रान्॥ब्रह्मयमम
ध्येमृत्युरोगान्आवा०॥२४॥गणानांत्वागृत्समदोगणाधिपतिर्जगती॥विना

यकावा० गणानांत्वा० ब्रह्मानिर्ऋतिमध्ये गणपतिं आवा०।२५। शंनोदेवीरांबरी
षः सिंधुद्वीप अपोगायत्री। अपावाह० शंनोदेवी० ब्रह्मवरुणमध्ये आपः
(१०) आवा०२६॥ मरुतोयस्यराकुगणो गोतमो मरुतोगायत्री। मरुतावा०
मरुतोयस्यहि० ब्रह्मसवायुमध्ये मरुतः आवा०२७। स्योनापृथिवीमेधातिथिर्भू
मिर्गायत्री॥ भूम्यावाह०॥ स्योनापृथिवी० भा:॥ ब्रह्मणः पादमूले कर्णिकाधः
पृथिवीं आ०॥२८॥ इमंमेगंगे सिंधुक्षित्प्रियमेधो गंगायमुनासरस्वत्यो जगती॥
गंगाद्यावा० इमंमेगंगेय० या॥ तत्रैव गंगादिनदीं आवा०॥२९॥ तत्रैव सप्तसागरा
न्॥ धाम्नोधाम्नो राजन्नितो वरुणो मुंच॥ यदापो अघ्न्या वरुणेति शपामहे त
तो वरुणो मुंच॥ मयि वापो मोषधीर्हिंसीः रेतो विस्वव्यचा भ्रस्वे नो वरुणो मु राम
च॥ सप्तसागरान् आवा०॥३०॥ तदुपरि नाममंत्रेण॥ मेरवे नमः मेरुं आवाह०॥



Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

बाह्यपरिधौ सोमादिक्रमेण॥ सुधावाहनं कुर्यात्॥ सोमसमीपे गदायै॰ गदां आ॰।
(10 A) तावत्सर्वत्र॥ ईशानसमीपे शूलाय॰ शूलं॰। इंद्रांतिके वज्राय॰ वज्रं आ॰। अग्निस
मीपे शक्त्यै॰ शक्तिं॰। यमांतिके दंडाय॰ दंडं आ॰। निर्ऋतिसमीपे खड्गाय॰ खड्गं आ॰।
वरुणांतिके पाशाय नमः॥ पाशं आ॰। वायुसमीपे अंकुशाय॰ अंकुशं॰। ततो बाह्ये॥
ॐ उत्तरे गौतमाय॰ गौतमं॰ ईशाने भरद्वाजाय॰ भरद्वाजं आ॰। पूर्वे विश्वा
मित्राय॰ विश्वामित्रं आ॰। आग्नेये कश्यपाय॰ कश्यपं आ॰। दक्षिणे जमदग्नये॰
जमदग्निं आ॰। नैर्ऋत्ये वसिष्ठाय॰ वसिष्ठं आ॰। पश्चिमे अत्रये॰ अत्रिं आ॰। वायव्ये
अरुंधत्यै॰ अरुंधतीं आ॰। ततो बाह्ये। पूर्वे ऐंद्र्यै नमः। ऐंद्रीं आ॰। आग्नेये कौमार्यै॰
कौमारीं आ॰। दक्षिणे ब्राह्म्यै नमः ब्राह्मीं आ॰। नैर्ऋत्ये वाराह्यै॰ वाराहीं आ॰। पश्चि
मे चामुंडायै॰ चामुंडां आ॰। वायव्ये वैष्णव्यै॰ वैष्णवीं आ॰। उत्तरे माहेश्वर्यै॰ माहे

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com